# Dasharatharajakritam Lalitadevi Stotram

# दशरथराजकृतं ललितादेवीस्तोत्रम्

## Document Information

Text title : Dasharatharajakritam Lalitadevi Stotram

File name : dasharatharAjakRRitaMlalitAdevIstotram.itx

Category : devii, devI, brahmANDapurANa, stotra, lalitA

Location : doc_devii

Proofread by : PSA Easwaran

Description/comments : brahmANDapurANa | uttarabhAga | lalitA | adhyAya 40/124-129||

Latest update : October 1, 2024

Send corrections to : sanskrit at cheerful dot c om


This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.


October 1, 2024

*sanskritdocuments.org*

# दशरथराजकृतं ललितादेवीस्तोत्रम्

चिरं ध्यात्वा महाराजः सुवासांसि बहूनि च ।
दिव्यान्यायतनान्यस्यै दत्त्वा स्तोत्रं चकार ह ॥ १२३॥

राजोवाच ।
पादाग्रलम्बिपरमाभरणाभिरामे मञ्जीररत्नरुचिमञ्जुलपादपद्मे ।
पीताम्बरस्फुरितपेशलहेमकाञ्चिकेयूरकङ्कणपरिष्कृतबाहुवल्लि ॥ १२४॥

पुण्ड्रेक्षुचापविलसन्मृदुवामपाणे रत्नोर्मिकासुमशराञ्चितदक्षहस्ते ।
वक्षोजमण्डलविलासिवलक्षहारि पाशाङ्कुशाङ्गदलसद्भुजशोभिताङ्गि ॥ १२५॥

वक्त्रश्रिया विजितशारदचन्द्रबिम्बे ताटङ्करत्नकरमण्डितगण्डभागे ।
वामे करे सरसिजं सुबिसं दधाने कारुण्यनिर्झरदपाङ्गयुते महेशि ॥ १२६॥

माणिक्यसूत्रमणिभासुरकम्बुकण्ठि भालस्थचन्द्रशकलोज्ज्वलितालकाढ्ये ।
मन्दस्मितस्फुरणशालिनि मञ्जुनासे नेत्रश्रिया विजितनीलसरोजपत्रे ॥ १२७॥

सुभ्रूलते सुवदने सुललाटचित्रे योगीन्द्रमानससरोजनिवासहंसि ।
रत्नानुबद्धतपनीयमहाकिरीटे सर्वाङ्गसुन्दरि समस्तसुरेन्द्रवन्द्ये ॥ १२८॥

काङ्क्षानुरूपवरदे करुणार्द्रचित्ते साम्राज्यसम्पदभिमानिनि चक्रनाथे ।
इन्द्रादिदेवपरिसेवितपादपद्मे सिंहासनेश्वरी परे मयि सन्निदध्याः ॥ १२९॥

इति स्तुत्वा स भूपालो बहिर्निर्गत्य भक्तितः ।
तस्यास्तु दक्षिणे भागे महागौरीं ददर्श ह ॥ १३०॥

इति ब्रह्माण्डपुराणे उत्तरभागे चत्वारिंशाध्यायान्तर्गतं
दशरथराजकृतं ललितादेवीस्तोत्रं समाप्तम् ।

ब्रह्माण्डपुराण । उत्तरभाग । ललिता । अध्याय ४०/१२४-१२९॥

brahmANDapurANa . uttarabhAga . lalitA . adhyAya 40/124-129..

Proofread by PSA Easwaran

*Dasharatharajakritam Lalitadevi Stotram*
pdf was typeset on October 1, 2024

Please send corrections to *sanskrit@cheerful.com*